श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि विरचितः

# ॥ गुरुवायुपुरीश मङ्गळस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness** ***śrīmad āṇḍavan*** **of** ***śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ गुरुवायुपुरीश मङ्गळस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

गुरुवायुपुरे नाथ गुरुवाग्विभवेऽथवा।
कुरुषे विहृतिं नित्यम् इति डोलायते मनः॥ १ ॥

गुरुमरुन्मुनिबृन्दनुताङ्घ्रये
गुरुवराकृतिमस्य समेयुषे।
गुरुमरुन्नगरोत्तमवासिने
गुरुमरुत्प्रथमाय नमो नमः॥ २ ॥

गुरुशिष्यसौम्यगुरुपूजनाश्रयं
कुरु चित्त कञ्चिदपि ते समाश्रयम्।
कुरुभीमसेनरणरङ्गभीषणं
गुरुभीमसेनगुरुपत्तनाधिपम्॥ ३ ॥

गुरुगन्धवाहनगरीविहारिणं
कुरुवंशजातविजयस्य सारथिम्।
गुरुमागमस्य परमं पुरातनं
कुरु मानसान्तरनिशं शुभाश्रयम्॥ ४ ॥

गुरुणा विनष्टनिजबालकाङ्क्षिणा
वरुणालयान्तरवतीर्य चोदितः।
अरुणाधरं तमुपनीय यो ददौ
करुणारसौघभरितं तमाश्रये॥ ५ ॥

श्रीजीवमारुतपुराधिप युष्मदीया
दृष्टा मया प्रतिकृतावपि दिव्यमूर्तिः।

www.prapatti.com

शान्ता गभीरमधुरा श्रमहारिणी मां
    हे जीव मा रुद इतीव किलाभिधत्ते॥ ६॥

धिषणा मम विवशा स्वयमधुना विधिनेयं
    कुरुते रतिमनिशं भृशमुररीकृतलास्या।
धिषणानिलनगरोत्तमतिलकायितधाम्ने
    निखिलागमशिरसिस्थितपदपङ्कजभूम्ने॥ ७॥

गुरुमारुतपत्तनैकधाम्ने
    निगमान्तोदितनैजकीर्तिभूम्ने।
भवुकाधिकसर्वकामसीम्ने
    स्पृहयत्येष सदेह कृष्णनाम्ने॥ ८॥

दुर्वादिनामिह कलावपि नास्तिकानां
    गर्वापनोदनविधौ पटुतां दधाने।
सर्वाभिवाञ्छितविधानसुपर्ववृक्षे
    गुर्वाञ्जनेयगुरुपत्तनराजि लीये॥ ९॥

गुरुगन्धवाहनगरीविहारिणे
    करवै नमांसि मम चित्तहारिणे।
निजपादभक्तशुभसङ्गकारिणे
    करुणां रमां च हृदि नित्यधारिणे॥ १०॥

हृदय सती गतिरिष्टा तव चेत्
    शृणु मम गिरमतिहितसृति लग्नाम्।
कुत रतिमिह सुरनुतिततिमहिते
    धिषणसमीरणपत्तननाथे॥ ११॥

जीव किमेभिर्यत्नैः
    जीवनमात्रेऽपि नात्र पर्याप्तैः।
जीव सदाश्रित्य मुदा
    जीवजगत्प्राणपत्तनप्राणम्॥ १२॥



www.prapatti.com

माया ते सततं तनोति ललितं मां मन्तयन्ती भवे
 माया ते दयिता दयारसमयी सा मामपायात् पुनः।
मा याया इति साकमागतवती रक्षां विधत्ते परां
 मायावल्गितमञ्जुमन्दहसितं मां वीक्ष्य धत्ते भवान्॥ १३ ॥

श्रीरामानुजदर्शने जलनिधेः यास्ति स्थितिस्तादृशी
 श्रीरामानुज दर्शने तव मम स्वामिन् कृपावारिधे।
श्रीरामानुजदर्शने मम रतिं संवर्धयेथास्सदा
 श्रीरामानुजया तनोतु वसतिं जाया तवास्मद्गृहे॥ १४ ॥

स्वामिन्नुद्धवपूजितामल महासौन्दर्यपूर्णाकृते
 श्रीमन्नुद्धवतां विलोचनवतां नित्यं किलात्राश्रित।
अस्माकं भवदङ्घ्रिसक्तमनसां हे प्राणभूत प्रभो
 श्रीवाचस्पतिगन्धवाहनगरीवासास्तु तुल्यं नमः॥ १५ ॥

गोदाचिन्तनतस्सदा खलु भवान् तत्त्वं गतो वर्तते
 गोदाकारयुतो ददाति यदितो गामीदृशीं मादृशे।
गोदाया हि वरं वरं घटयतात् स्वामिन् सुताया मम
 गोदानौघफलं सकृत्किल भवत्सञ्चिन्तनं सौति नः॥ १६ ॥

पीताम्बरं धृतवता पुरुषोत्तमेन
 गीतां परेण भवता भवतापहन्त्रीम्।
गीतां परेण समरे न तथाविधेऽपि
 नीतां परां निगमतोऽपि वदन्ति सन्तः॥ १७ ॥

पुरा तुरङ्गाननभूमिकावान्
 वेदानदास्त्वं विधये हिताय।
जातो नियन्ताथ तुरङ्गमानां
 गीतामियं साधु गता परत्वम्॥ १८ ॥

गुरुमरुद्भुजि ते सगरे पुरा
 स्वजनखेदमदात् किल नर्तनम्।



www.prapatti.com

गुरुमरुन्नगरे पुनरद्य तत्
  निखिललोकमुदे परमेधते॥ १९ ॥

गुरुमरुन्नगरे यदि नो रतः
  गुरुमरुद्भुजि सक्त तदा तव।
गुरु न तल्पसुखं भविता ततः
  गुरुमरुन्नगरे निरतस्सदा॥ २० ॥

गुरुहनुमद्गुरुनगरे
  गुर्वीं प्रीतिं समेयुषे भवते।
उर्वीतलवैकुण्ठे
  मौर्वीव नता जयं यामः॥ २१ ॥

गुरुपङ्क्तिनिवासनिर्मलम्
  हृदयं संवहता कवीन्दुना।
गुरुवायुपुरीशविंशतिः
  रचिता श्रीनिधिना निधिस्सताम्॥ २२ ॥

॥ इति गुरुवायुपुरीश मङ्गळस्तवः समाप्तः ॥

www.prapatti.com